**कौण्डिन्य** पुंस्त्री कुण्डिनस्यर्षेर्गोत्रापत्यं गर्गा०यञ्। कुण्डिन गोत्रापत्ये। "कौण्डिन्यात् कौण्डिन्य" शत०ब्रा०१४।५।५।२०। स्त्रियां तु ङीपि यलोपः "पाराशरकौण्डिनी-पुत्रात् पाराशरकौण्डिनीपुत्रः" शत० ब्रा० १४।६।४।३० वंशब्राह्मणे। कुण्डिनस्य युवापत्यम् गर्गा० यञि यञन्तात् फक्। कौण्डिन्यायन कुण्डिनस्य युवापत्ये पुंस्त्री "कौण्डिन्यायनाच्च कौण्डिन्यायनः" शत० ब्रा० १४।५।५।२०। कौण्डिन्यस्य छात्रः कण्वा० अण् यलोपश्च। कौण्डिन कौण्डिन्यस्यच्छात्रे। बहुषु अणोलुक् कुण्डिनादेशश्च कुण्डिनः। स्त्रियां तु न लुक् किन्तु गोत्रत्वात् ङीष्यलोपौ कौण्डिनी।

**कौण्डिल्यक** पु० १सुश्रुतोक्ते शकृन्मूत्रविषे जन्तुभेदे विषशब्दे विवृतिः। २तत्रोक्ते कीटभेदे च कीटशब्दे विवृतिः

**कौण्डोपरथ** पु०। आयुधजातिसंघे ततः स्वार्थे छ। कौण्डोपरथीय तदर्थे। "आहुस्त्रिगर्त्तषष्ठांस्तु कौण्डोपरथदाण्डिकाः क्रौष्टुकिर्जालमानिश्च ब्रह्मगुप्तोऽथ जालकिः" सि० कौ०। [ तस्कुतोभवे।

**कौतस्कुत** त्रि० कुतः कुतोभवः अण् टिलोपः कस्का०। कुकौतस्त त्रि० कुतस्त्येभवः अण् नि० वेदे यलोपः। कुतस्त्यभवे। "कौतस्तावध्वर्यू अरिमेजयस्य जनमेजयस्य" पारा० ब्राह्म०।

**कौतुक** न० कुतुकस्य भावः युवादि० अण् प्रज्ञा० स्वार्थे अण् वा। १कुतूहले अमरः। तत्र अद्भुतजिज्ञासातिशयः। "कौतुकागारमागात्" कुमा०। २मङ्गलार्थहस्तसूत्रे शाश्वतः "वैवाहिकैः कौतुकसंविधानैः" कुमा०। ३उत्सवे ४अभिलाषे ५नर्म्मणि ६हर्षे ७परम्परायातमङ्गले ८गीतादिभोगे ९भोगकाले च हेम०।

**कौतूहल** न० कुतूहलस्य तदन्वितस्य भावः कर्म्म वा युवा० अण् प्रज्ञादि०स्वार्थे अण् वा। कुतूहले "विस्तरश्रवणे जातं कौतूहलमतीव मे" भा० आ० ६२अ०। "महत् कौतूहलं मेऽस्ति हरिश्चन्द्रकथां प्रति" मार्क० ८।१।

**कौतूहल्य** न० कुतूहल+ब्राह्मणा० स्वार्थे ष्यञ्। कुतूहले

**कौतोमत** पु० कुतोमतस्यापत्यम् ऋष्यण्। ऋषिभेदे। "सहस्रवाङ्गौपत्य इति कौतोमतेन" गोपथब्राह्मणम्।

**कौत्स** पुंस्त्री कुत्सस्य ऋषेरपत्यम् ऋष्यण्। कुत्सापत्ये "भूर्भुवः स्वरिति जपित्वा कौत्सोहिङ्करोति" आश्व०श्रौ० सू० १।२।५। "कौत्साय दत्त्वा कन्यान्तु हंसीं नाम यशस्विनीम्" भा० आनु० १२७अ०। "कौत्सः प्रपेदे वरतन्तुशिष्यः" रघुः। बहुषु तस्य लुक्। कुत्साः तदपत्येषु। कुत्सेन दृष्टं साम अण्। कुत्सर्षिदृष्टे विकृतियागे गेये सामभेदे। तच्च साम वेगाने १६प्र० २अर्द्धे १०गानम्। "कौत्सं भवति काण्वं भवति" श्रुतिः।

**कौथुम** त्रि० कुथुमं वेदशाखाभेदमधीते वेद वा अण्। १कुथुमशाखाध्यायिनि तद्वेत्तरि च। तस्य कार्त्तकौजपादित्वात् द्वन्द्वे पूर्वपदं प्रकृत्या। कठकौथुमाः इत्यादि। "अनुवादे चरणानाम्" पा० द्वन्द्वे एकवत् प्रत्यष्ठात् कठकौथुमम्। "स्थेणोर्लुङि" वार्त्ति० स्थाधातोरिणधातोश्च लुङ्प्रयोग एव तस्य तथात्वं नियमितम् [ ब्रह्मवै०जातिशब्दे विवृतिः

**कौदालीक** पुंस्त्री० रजक्यां तीवराज्जाते संकीर्णवर्णभेदे

**कौद्रविक** न० कोद्रवो निमित्तमस्य ठञ्। सौवर्चललवणे राजनि० [ धान्यभवनयोग्ये क्षेत्रे अमरः

**कौद्रवीण** न० कोद्रवस्य भवनं क्षेत्रं कोद्रव+खञ्। कोद्रव

**कौद्रा(न्द्रा)यण** पुंस्त्री० कुद्र(न्द्र)स्य ऋषेर्युवापत्यम् इञन्तात् कौद्रिः(न्द्रिः) इञन्तत्वात् यून्यपत्ये फक्। कुद्रि(न्द्रि) नामर्षेर्युवापत्ये ततः अरीहृ० चतुरर्थ्यां वुञ्। कौन्द्रायणक तत्सन्निकृष्टदेशादौ त्रि०

**कौनख्य** न० कुनखिनोभावः ष्यञ् टिलोपः। कुत्सितनखरूपे रोगभेदे तच्च सुवर्णस्तेयमहापातकजचिह्नम् "सुवर्णचौरः कौनख्यम्" मनूक्तेः। [ निर्वृत्तादौ

**कौन्तायनि** त्रि० कुन्ती+चतुरर्थ्यां कर्णा० फिञ्। कुन्ती-

**कौन्तिक** कुन्तः प्रहरणमस्य ठञ्। कुन्तास्त्रेण युद्धकारके अमरः। [प्रभौ अमरः

**कौन्ती** स्त्री कुन्तिषु देशेषु भवा अण् ङीप्। भक्तगन्धिन्यो-

**कौन्तेय** पु० कुन्त्या अपत्यम् ढक्। १युधिष्ठिरादिषु त्रिषु। "कौन्तेय! प्रतिजानीहि न मे कर्म्मफले स्पृहा" गीता २अर्ज्जुनवृक्षे राजनि० तस्य तत्तुल्यनामत्वात्तथात्वम्।

**कौप** त्रि० कूपस्येदमण्। कूपसम्बन्धिनि जलादौ "सक्षार पित्तलं कौपं श्लेष्मघ्नं दीपनं लघु" सुश्रुते तद्गुणा उक्ताः। "वसन्ते कौपं प्रास्रवणं वा पीयूषेवम्" सुश्रुतोक्तकाले तस्य सेव्यता। स्त्रियां ङीप्।

**कौपीन** न० कूपे पतनमर्हति खञ् अकार्य्ये नि०। १अकार्य्ये २पापे ३गुह्यप्रदेशे अमरः ४चीरे त्रिका० ५मेखलाबद्धे वस्त्रखण्डे (कपनी) मेदि० तद्द्वारेण कूपे पतनात् तस्य तथात्वम्। अकार्य्यवदाच्छाद्यत्वात् ६पुरुषलिङ्गे शब्दचि० तदावरकतया वस्त्रखण्डस्य कौपीनत्वम्। "कौपीनवन्तः खलु भाग्यवन्तः" पुरा० "कौपीनाच्छादनं यावत्तावदिच्छेच्च